# पञ्चतन्त्रम्

संस्कृत गल्पसाहित्यस्य इतिहासे प्राचीनतमः गल्पग्रन्थः पञ्चतन्त्रम्। दक्षिणभारतीयः कविः विष्णुशर्मा अस्य ग्रन्थस्य प्रणेता। दाक्षिणात्यस्य महिलारोप्य इति नगरस्य राजा आसीत् अमरसिंहः। तस्य च राज्ञः मूर्खपुत्राणां विद्याशिक्षार्थं नीतिशिक्षार्थं च विष्णुशर्मणा पञ्चतन्त्रं विरचितम्।

सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं काव्यम्।।

सर्वाणि अर्थशास्त्राणि कामशास्त्राणि नीतिशास्त्राणि साहित्यानि च पर्यालोच्य कविः विष्णुशर्मा विश्वस्य प्राचीनतमं गल्पसाहित्यं पञ्चतन्त्रं विरचितवान्।

ग्रन्थेऽस्मिन् पञ्च अध्यायाः सन्तिः। अध्यायाः अत्र 'तन्त्रम्' इति नाम्ना अभिहिताः। एतानि पञ्चतन्त्राणि यथा—मित्रभेद–मित्रप्राप्ति–काकोलूकीय-लब्धप्रणाश–अपरीक्षितकारकानि।

पञ्चतन्त्रग्रन्थस्य तन्त्रपञ्चके साकुल्येन ७४ संख्यकानि गल्पानि सन्ति। सरलसंस्कृतभाषया शिशुपाठ्यरूपेण पञ्चतन्त्रस्य गल्पानि विरचितानि। शिशुचित्तम् आकर्षयितुं गल्पेषु पशुपक्षिणः चरित्ररूपेण चित्रिताः। सर्वेषां च गल्पानां परिणतौ कस्यचित् नीतिवाक्यस्य संयोजनं कविना कृतम्।

पञ्चतन्त्रं विश्वसाहित्ये सर्वापेक्षतः बहुलप्रचारितः गल्पग्रन्थः। समग्रे विश्वे द्विशताधिकासु भाषासु पञ्चतन्त्रस्य संस्करण प्रकाशितम्। पाश्चात्यस्य 'वाइवेल' इति ग्रन्थात् परं पञ्चतन्त्रमेव सर्वाधिकः प्रचारितः गल्पग्रन्थः। पञ्चतन्त्रस्य मूलग्रन्थः अधुना कालकवलितः। पञ्चतन्त्रम् अवलम्ब्य परवर्त्तीकालेषु रचितेषु ग्रन्थेषु पञ्चतन्त्रकथा

समुपलभ्यते। तेषु च ग्रन्थेषु ‘तन्त्राख्यायिका’ ‘पञ्चाख्यानकम
‘हितोपदेशः’ नामकाः ग्रन्थाः अन्यतमाः।

# सिंहासनद्वात्रिंशिका

इतिहासस्य किंवदन्तीमहाराजं विक्रमादित्यमाश्रित्य संस्कृतसाहित्ये ये खलु गल्पग्रन्थाः विरचिताः तेषु अन्यतमा सिंहासनद्वात्रिंशिका। सिंहासनद्वात्रिंश्का अन्यत् भिन्ननाम्नापि परिचिता। यथा—

विक्रमार्कचरितम्, विक्रमचरितम्, द्वात्रिंशत् पुत्तलिका च। अयञ्च ग्रन्थः केन विरचितः इति विषयं केन्द्रीकृत्य वितर्कः अस्ति। कालिदासः वररुचिः रामचन्द्रः सिद्धसेनः दिवाकरः क्षेमेन्द्रः—इत्येवं बहवः कवयः सिंहासनद्वात्रिंशिकायाः रचयितारूपेण कल्पिताः आसन्।

श्रूयते यत् विश्रुतकीर्त्तिः महाराजःविक्रमादित्यः देवराजात् इन्द्रात् सिंहासनमेकम् उपहारस्वरूपं प्राप्तवान्। सिंहासनमिदं द्वात्रिंशत् पुत्तलिकाभिः वाहितमासीत्। विक्रमादित्यस्य मृत्योः परं पुत्तलिकावाहितं सिंहासनं भूगर्भे प्रोथितमभवत्। परवर्त्तीकाले धारानृपतिः भोजः गोपालकेभ्यः सिंहासनविषयम् अवगम्य भूगर्भस्थितं सिंहासनम् उत्तुल्य तस्मिन् आरोहन्तुम् उद्योगी अभवत्। तस्मिन् क्षणे पुत्तलिकाः सर्वाः जीविताः भूत्वा राजानं भोजं विक्रमादित्यस्य सुकीर्त्तिम् आश्रित्य एकैका पुत्तलिका एकैकं गल्पं निर्वण्य अन्तर्हिता अभवत्। इत्थं द्वात्रिंशत् पुत्तलिकाः सर्वाः द्वात्रिंशत् गल्पानि अवर्णयन्। तेषां द्वात्रिंशत् गल्पानां सङ्कलनं हि सिंहासनद्वात्रिंशिका।

सिंहासनद्वात्रिंशिका सरलसंस्कृतभाषया रचिता। विविधासु भाषासु अस्य गल्पग्रन्थस्य अनुवादः प्रकाशितःअभवत्।

# शुकसप्ततिकथा

संस्कृतगल्पसाहित्यस्य अतीव समृद्धं सङ्कलनं शुकसप्ततिकथा। कविः चिन्तामणिभट्टः शुकसप्ततिकथायाः रचयिता। खीष्टये एकादश-द्वादशशतके ग्रन्थोऽयं विरचितः अभवत्।

शुकसप्ततिकथा सप्ततिः गल्पानां सङ्कलनम्। गल्पानां वक्ता कश्चित् शुकपक्षी। देवदासनामकस्य कस्यचित् ब्राह्मणराजकर्मचारिणः एकः पालितः शुकपक्षी आसीत्। देवदासपत्नी परमरूपवती च आसीत्। राजा तां देवदासपत्नीम् अपहर्त्तुं राजकार्यव्याजेन देवदासं स्थानान्तरे प्रेरितवान्। देशान्तरं गमनात् पूर्वं देवदासः शुकपक्षिणः उपरि स्वपत्न्याः दायित्वभारं अर्पितवान्।

देवदासस्य अनुपस्थितौ राज्ञः पूर्वसङ्केतानुसारं देवदासपत्नी यदा गृहत्यागे उद्योगिनी अभवत् तदा शुकपक्षी चारित्रिकविशुद्धिताम् आश्रित्य ताम् एकां काहिनीं आश्रावयत्। गल्पस्य आकर्षणात् देवदासपत्न्याः गृहत्यागं प्रतिरुद्धं जातम्। इत्थं सप्ततिरजन्यां सः शुकपक्षी देवदासपत्नीं सप्ततिगल्पं अकथयत्। एषां सप्तति गल्पानां सङ्कलनं हि शुकसप्तति कथा।

शुकसप्ततिकथायां पञ्चतन्त्रस्य प्रभावः परिलक्ष्यते। कपटप्रणयं विश्वासहीनता चारित्रिकविशुद्धितारक्षा हि शुकसप्ततिकथायाः